International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2018; 4(1): 108-111
© 2018 IJSR
www.anantaajournal.com
Received: 18-11-2017
Accepted: 20-12-2017

**राघवेन्द्रमिश्रः**
गवेषकः, स्ना. ज्योतिषविभागः, का. सिं.द.सं विश्वविद्यालयः, दरभंगा, बिहार, भारत

**Correspondence**
**राघवेन्द्रमिश्रः**
गवेषकः, स्ना. ज्योतिषविभागः, का. सिं.द.सं विश्वविद्यालयः, दरभंगा, बिहार, भारत

# अन्तर्दशानयनम्

**राघवेन्द्रमिश्रः**

**प्रस्तावना**

दश्यते परिमीयते इति दशा। अर्थात् दशा कालखण्डस्यैव अपरनामेति। मानवजीवनस्य सम्पूर्णजीवनकाले कानिचित् प्रमुखकालखण्डानि भवन्ति, कानिचित् अन्तर–प्रत्यन्तरकालखण्डानि च जायन्ते। समेषां सम्बन्धः विभाजनाधारेण सूक्ष्मातिसूक्ष्ममानवजीवनोपयोगिकालस्य शुभाशुभत्वनिर्धारणं वर्त्तते। आचार्य–वैद्यनाथेनप्रोक्तं– यथा जगतः वर्गविभाजनेन गणना सरलतया सम्भवते, तथैव मानवजीवने दशानुसारेण सर्वफलं ज्ञायते। तद्यथा–

> दशाफलं सर्वफलं नराणां वर्णानुसारेण यथा विभागः।[1]

दशावर्षप्रमाणान्तर्गतमन्तर्दशा भवति। यतो हि दशावर्षे बहुचक्रपरिवर्तनं दृश्यते। यत्र कालखण्डान्यपि बहूनि गच्छन्ति। अतएव अन्तर्दशामाध्यमेन मानवस्य वर्षादिकं फलं प्रतिपादितमस्ति। यथोक्तं पराशरेण–

> तमोग्रहौ शुभारूढावसम्बन्धेन केनचित्।
> अन्तर्दशानुसारेण भवेतां योगकारकौ।।[2]

अत्र अन्तर्दशानयनं केन प्रकारेण भवतीत्येताषां सर्वासां प्रक्रियाणां सम्यक्तया विवेचनं क्रियते। सर्वप्रथमं लघुजन्मपद्धतेः रीत्या अन्र्दशानयनं प्रस्तूयते–

> दशाब्दघ्नं दशावर्षं दशाब्दयुति भाजितमृझ[3]।
> अन्तर्दशाक्रमादेवं शेषं पाकोक्तिवत् स्फुटम्।।[4]

अर्थात् दशावर्षम्=दशापतिवर्षमानं, दशाब्दघ्नम्=अन्तर्दशापतेः वर्षमानेन गुणितव्यम्, दशाब्दयुतिभाजितम्=सम्पूर्णदशावर्षसंख्यया भाजितम्। तदा अन्तर्दशा स्पष्टा भवति। एवं प्रकारेण सर्वेषामन्तर्दशानयनं भवति। शेषं पाकोक्तिवत् महादशा– प्रकारेणोक्तरीत्या क्रमशः अन्तर्दशामानं स्पष्टं भवति। तद्यथा–

सूर्यस्य विंशोत्तरीदशायां समेषां ग्रहाणामन्तर्दशाभीष्टा चेत्–

(i) सूर्यस्य दशायां सूर्यान्तर्दशा–
सूर्यदशावर्षाणि=6
∴ (6×6) ÷120=36÷120=3÷10=0 ।03 ।18 वर्षादिकम्।

(ii) सूर्यस्य दशायां चन्द्रस्यान्तर्दशा–
सूर्यदशावर्षाणि=6, चन्द्रदशावर्षाणि=10
∴ (6×10)÷120=1÷2=0 ।06 ।00 वर्षादिकम्।

(iii) सूर्यदशायां कुजान्तर्दशा–
कुजदशावर्षाणि=7
∴ (6×7) 120=42÷120=7÷20=0 ।04 ।06 वर्षादिकम्।

(iv) सूर्यदशायां राह्वन्तर्दशा–
राहुदशावर्षाणि=18
∴ (6×18)÷120=9 10=0 |10 |24 वर्षादिकम् ।

(v) सूर्यदशायां गुर्वन्तर्दशा–
गुरुदशावर्षाणि=16
∴ (6×16)÷120=4÷5=0 |09 |18 वर्षादिकम्।

(vi) सूर्यदशायां शन्यन्तर्दशा–
शनिदशावर्षाणि=19
∴ (6×19)÷120=19÷20=0 |11 |12 वर्षादिकम्।

(vii) सूर्यदशायां बुधान्तर्दशा–
बुधदशावर्षाणि=17
∴ (6×17)÷120=17÷20=0 |10 |06 वर्षादिकम्।

(viii) सूर्यदशायां केत्वन्तर्दशा–
केतुदशावर्षाणि=7
∴ (6×7)÷120=6÷20=0 |04 |06 वर्षादिकम्।

(ix) सूर्यदशायां शुक्रान्तर्दशा–
शुक्रदशावर्षाणि=20
∴ (6×20)÷120=1 |00 |00वर्षादिकम्।

एवमेव चन्द्रादीनां दशायां समेषां ग्रहाणामन्तर्दशा स्पष्टा भवति। अपि च मङ्गलादियोगिनीदशायामन्तर्दशानयनम् अधोलिखितास्सन्ति। तद्यथा–मङ्गलायोगिनी– दशायां सर्वासामन्तर्दशा–

(i) मङ्गलादशायां मङ्गलान्तर्दशा–
मङ्गलादशावर्षम्=1
∴ (1×1)÷36=0 |0 |10 वर्षादिकम्।

(ii) मङ्गलादशायां पिङ्गलान्तर्दशा–
पिङ्गलादशावर्षम्=2
∴ (1×2)÷36=1÷18=0 |0 |20 वर्षादिकम्।

(iii) मङ्गलादशायां धान्यान्तर्दशा–
धान्यादशावर्षाणि=3
∴ (1×3)÷36=1÷12=0 |1 |00 वर्षादिकम्।

(iv) मङ्गलादशायां भ्रामर्यन्तर्दशा–
भ्रामरीदशावर्षाणि=4
∴ (1×4)÷36=1÷9=0 |1 |10 वर्षादिकम्।

(v) मङ्गलादशायां भद्रिकान्तर्दशा–
भद्रिकादशावर्षाणि=5
∴ (1×5)÷36=5÷36=0 |1 |20 वर्षादिकम्।

(vi) मङ्गलादशायामुल्कान्तर्दशा–
उल्कादशावर्षाणि=6
∴ (1×6)÷36=1÷6=0 |2 |00 वर्षादिकम्।

(vii) मङ्गलादशायां सिद्धान्तर्दशा–
सिद्धादशावर्षाणि=7
∴ (1×7)÷36=7÷36=0 |2 |10 वर्षादिकम्।

(viii) मङ्गलादशायां सङ्कटान्तर्दशा–
सङ्कटादशावर्षाणि=8
∴ (1×8÷36=2÷9=0 |2 |20 वर्षादिकम्।
एवमेव पिङ्गलाद्यन्तर्दशा स्पष्टा भवति।
एवमेव लघुपाराशर्य्याम्–

**दशाब्दाः स्व स्व मानेन हताः खार्कोद्धृताः फलम्।**
**अन्तर्दशा भवेदेवं प्रत्यन्तर्दशादयः।।**[5]

अर्थात् यस्य ग्रहस्य विंशोत्तरीदशायां यस्य कस्यापि इष्टग्रहस्य अन्तर्दशा साध्यते, तयोः दशावर्षाणि गुणयित्वा 120वर्षैः भाजनेन लब्धिः वर्षादिकम् अन्तर्दशामानं भवति।
अन्तर्दशाज्ञानाय–
(ग्रहविंशोत्तरीदशावर्षाणि इष्टदशावर्षाणि)÷120=वर्षादिकमन्तर्दशा।
अपि च–
अन्तर्दशासाधनार्थम्–
ग्रहविंशोत्तरीदशावर्षम् अन्तर्दशाग्रहदशावर्षम्=गुणनफलम्।
एकस्थानस्थिताङ्कं त्रिभिर्गुणयित्वा दिनानि भवन्ति। ततः दशमस्थानस्थ शेषाङ्काः मासाः, तेषां द्वादशभाजनेन वर्षादिकं कुर्यात्।
यथोदाहरणम्–बृहस्पतिविंशोत्तरीदशायां बृहस्पति–अन्तर्दशा साधनीया–
16×16=256,
अत्र 6 3=18 दिनानि,
25 मासाः = 2 वर्षे, 1 मासः।
अर्थात्, 2 |1 |18 वर्षादिकमन्तर्दशामानम्। अनेनापि प्रकारेण साधयितुं शक्यते।
एवमेव ज्योतिषरत्नाकरेऽपि।[6]

**भावकुतूहले**

दशा दशाहता कार्या विहृता परमायुषा।
अन्तर्दशाक्रमादेवं विदशाऽप्यनुपातः।।[7]

अर्थात् विंशोत्तरीदशापतेर्मानमन्तर्दशापतेः वर्षमानेन गुणयित्वा परमायुः 120वर्षैः भाजनेन लब्धवर्षादिकमन्तर्दशापतेः अन्तर्दशामानानि भवन्ति।

**होराशास्त्रे**

दशा दशाब्दगुणिता विह्वता परमायुषा।
लब्धमब्दादिकं विज्ञैर्वेद्यमन्तर्दशोद्भवम्।।[8]

अर्थात् यस्य कस्यापि ग्रहस्य विंशोत्तरीदशायां तत्तद्ग्रहाणामन्तर्दशायाः ज्ञानमपेक्षितं चेत् तर्हि उभयोर्महादशावर्षाणि गुणयित्वा परमायुवर्षैः भाज्यम्, लब्धवर्षादिकमपेक्षितान्तर्दशा भवति।
अपि च–

आद्या दशापतेरन्तर्दशाऽन्येषां ततः क्रमात्।[9]

अर्थात् कस्यापि विंशोत्तरीदशायां प्रथमतः तस्यैवान्तर्दशा भवति। पुनः ''आ० चं० कु० रा० जी० श० बु० के० शु०'' इति क्रमानुसारं सर्वेषां ग्रहाणामन्तर्दशाः भवन्ति।

**जन्मपत्रदीपके**

दशादशाघातभवस्य योऽङ्क आद्यः स धीरैस्त्रिगुणो विधेयः।
तावन्मिताः स्युर्दिवसाश्च मासाः शेषाङ्कतुल्याः सुधियाऽवगम्याः।।[10]

अर्थात्, यस्य ग्रहस्य विंशोत्तरीदशायामन्तर्दशा साधनीया स्यात्, तदुभयोः ग्रहयोः महादशावर्षयोः परस्परं गुणनं विधेयम्। तत्र आद्याङ्कं त्रिभिर्गुणितं तदा दिनं भवति। शेषाङ्कसमः मासः भवति (माससंख्या यदि द्वादशाधिका चेत् तर्हि द्वादशभिर्भाजयित्वा वर्षं करणीयम्)।
पुनस्तत्रैव जन्मपत्रदीपके–

स्वैः स्वैर्दशाब्दैर्गुणितं दशादिवर्षादिकं विंशतियुक्शतेन।
भजेच्च लब्धं हि निजान्तरान्तर्दशादिमानं कथितं मुनीन्द्रैः।।[11]

अर्थात् यस्य ग्रहस्यान्तर्दशासाध्यं भवति, तस्य ग्रहस्य विंशोत्तरीदशावर्षम् अन्यग्रहस्य दशावर्षेण गुणयित्वा 120भिः भाजनेन अन्तर्दशावर्षादिकं भवति।
अवरोहक्रमेण ध्रुवकवशात् अन्तर्दशासाधनमपि विद्वद्भिः विहितम्। तदप्यत्र उपस्थाप्यते। यथा जन्मपत्रदीपके[12]–

रामैर्हताश्चार्कमुखग्रहाणां दशाब्दकास्ते दिवसा भवन्ति।
दशासमानां खलु षष्ठभागः शुक्रस्य भुक्तिः सकलग्रहेषु।।
दशेश्वरदिनैर्हीना शुक्रभुक्तिर्भवेच्छनेः।
सैव हीना दशानाथदिनैश्चागोः स्मृता हि सा।।
रहिता चैव सा ज्ञेया चन्द्रजस्य तु तैर्दिनैः।
एवं हीना च सा ज्ञेया दशानाथदिनैर्गुरोः।।
अगोस्त्रिभागं रविभुक्तिमाहुः शुक्रस्य चार्धं हिमगोर्भवेत्सा।
युता दशानाथदिने रवेस्तु भुक्तिर्भवेच्चैव कुजस्य केतोः।।
एवं समस्तग्रहभुक्तयस्तु कार्या दिनेशादिखगेश्वराणाम्।।

अर्थात् सूर्यादीनां ग्रहाणां विंशोत्तरीदशावर्षं त्रिभिर्गुणितं चेत्तदा ध्रुवकः भवति। प्रत्येकस्य ग्रहस्य विंशोत्तरीदशावर्षस्य षष्ठांशभागसमः शुक्रस्यान्तर्दशा भवति। शुक्रस्यान्तर्दशायां ध्रुवकमृणेन शनेरन्तर्दशा, शनेरन्तर्दशायां ध्रुवकमृणेन राहोरन्तर्दशा, राहोरन्तर्दशायां ध्रुवकमृणेन बुधस्यान्तर्दशा, बुधस्यान्तर्दशायां ध्रुवकमृणेन बृहस्पतेरन्तर्दशा भवति। राहोरन्तर्दशायाः तृतीयांशतुल्या सूर्यस्यान्तर्दशा, शुक्रान्तर्दशायाः अर्धसमा चन्द्रमसोऽन्तर्दशा तथा च सूर्यान्तर्दशायां ध्रुवकयोजनेन कुजस्य केतोश्चान्तर्दशा भवति। तद्यथा–
सूर्यस्य विंशोत्तरीदशायां समेषां ग्रहाणामन्तर्दशाभीष्टाश्चेत्–
सूर्यस्य दशावर्षम्=6, इमं त्रिभिर्गुणित चेत्–
6×3=18 दिनानि ध्रुवकः।
अस्याः दशायाः षष्ठांशः=6÷6=1 वर्षादिकं शुक्रान्तर्दशा।
अस्यां ध्रुवकशोधनेन–
1 |00 |00–00 |00 |18=0 |11 |12 वर्षादिकं शन्यन्तर्दशा।
अस्यां ध्रुवकशोधनेन–
0 |11 |12–0 |00 |18=0 |10 |24 वर्षादिकं राह्वन्तर्दशा।
अस्यां ध्रुवकशोधनेन–
0 |10 |24–0 |00 |18=0 |10 |06 वर्षादिकं बुधान्तर्दशा।
अस्यां ध्रुवकशोधनेन–
0 |10 |06–0 |00 |18=0 |09 |18 वर्षादिकं गुर्वन्तर्दशा।
राहोरन्तर्दशायाः तृतीयांशः–
0 |10 |24÷3=0 |03 |18 वर्षादिकं सूर्यान्तर्दशा।
शुक्रान्तर्दशायाः अर्द्धसमा–
1 |00 |00÷2=0 |06 |00 वर्षादिकं चन्द्रान्तर्दशा।
सूर्यान्तर्दशायां ध्रुवकयोजनेन–
0 |03 |18+0 |00 |18=0 |04 |06 वर्षादिकं कुज–केत्वोरन्तर्दशा।
एवमेव चन्द्रादीनामन्तर्दशाः ज्ञेयाः।
एवञ्च यथावरोहक्रमेणान्तर्दशासाधनं संप्रोक्तं तथैवारोहणक्रमेणापि। तदप्यत्र प्रस्तूयते। यथा तत्रैव जन्मपत्रदीपके[13]–

निघ्नं त्रिभिः खलु खगस्य दशाप्रमाणं स्पष्टं भवेद्ध्रुवकसंज्ञकमन्तरार्थम्।
दिग्भी रसैश्च गुणितं क्रमशो भवेतां स्पष्टेऽन्तरे हिमरुचो दिवसेश्वरस्य।।
द्वयोर्युताविन्द्रगुरोः प्रमाणं ततो भवेयुर्ध्रुवकस्य योगात्।
बुधाऽगुसौर्य्याऽऽस्फुजितां क्रमेणान्तराब्दमानानि परिस्फुटानि।।
सूर्यान्तरे तद्ध्रुवकस्य योगाद्भौमस्य केतोश्च परिस्फुटत्वम्।
ज्ञेयं बुधैः सद्धिषणाधनाढ्यैः सज्ज्यौतिषालोडनसुप्रवीणैः।।

अर्थात् यस्य ग्रहस्य विंशोत्तरीदशायां ग्रहाणामन्तर्दशासाधनमभीष्टं भवति, तस्य ग्रहस्य विंशोत्तरीदशावर्षं त्रिभिर्गुणितं चेत्तदा ध्रुवकः स्यात्। तं ध्रुवकं क्रमशः दशभिः षड्भिश्च गुणितेन चन्द्रमसः सूर्यस्य चान्तर्दशा भवति। अनयोः (सूर्यचन्द्रमसोः) अन्तर्दशयोः योगसमा बृहस्तेरन्तर्दशा भवति। बृहस्पतेरन्तर्दशायां पुनः–पुनः ध्रुवकं योजनेन क्रमशः बुध–राहु–शनि–शुक्रश्चैतेषामन्तर्दशाः भवन्ति। सूर्यस्यान्तर्दशायां ध्रुवांकयोजनेन कुजस्य केतोश्चान्तर्दशा भवति। तद्यथा–
सूर्यस्य विंशोत्तरीदशायां ग्रहाणामन्तर्दशा अभीष्टा चेत्–
सूर्यस्य दशावर्षं त्रिभिर्गुणितञ्चेत्–
6×3=18 दिनानि=ध्रुवकः।
एनं क्रमशः दशभिः षड्भिश्च गुणितं चेत्–
18 10=180दिनानि=0 |06 |00 वर्षादिकं चन्द्रान्तर्दशा।
18 6=108 दिनानि=0 |03 |18 वर्षादिकं सूर्यान्तर्दशा।
उभयोः (सूर्यचन्द्रयोः) योगसमा–
0 |03 |18+0 |06 |00=0 |9 |18 वर्षादिकं बृहस्पत्यन्तर्दशा।
अस्मिन् ध्रुवक(0 |0 |18) योजनेन–
0 |9 |18+0 |0 |18=0 |10 |06 वर्षादिकं बुधस्यान्तर्दशा।
एतस्मिन् ध्रुवकं योज्यं चेत्–
0 |10 |06+0 |0 |18=0 |10 |24 वर्षादिकं राह्वन्तर्दशा।
पुनः अस्मिन् ध्रुवकं योज्यञ्चेत्–
0 |10 |24 |+0 |0 |18=0 |11 |12 वर्षादिकं शन्यन्तर्दशा।
पुनः अस्मिन् ध्रुवकयोजनेन–
0 |11 |12+0 |0 |18=1 |00 |00 वर्षादिकं शुक्रान्तर्दशा।
पुनश्च सूर्यस्यान्तर्दशायां ध्रुवकं योज्य चेत्–
0 |03 |18+0 |0 |18=0 |04 |06 वर्षादिकं केतुकुजयोरन्तर्दशा।
एवमेव चन्द्रादीनामन्तर्दशाः ज्ञेयाः।
अपि च पुनरपि तत्रैव जन्मपत्रदीपके[14]–

दशा दशाहता कार्या शिवनेत्र3विभाजिता।
लब्धं मासादिकं ज्ञेयं योगिन्यामन्तरं स्फुटम्।।

योगिनीदशावर्षमन्तर्दशेशवर्षेण गुणयित्वा त्रिभिर्भाजनेन लब्धमासादि–कमन्तर्दशा भवति। तद्यथा–
मङ्गलादशायां मङ्गलान्तर्दशा अभीष्टा चेत्–
मङ्गलादशावर्षम्–1
(1 1)÷3=0 |10 मासादिकं मङ्गलान्तर्दशा।

**जातकपारिजाते**

दशां दशाब्दसङ्गुण्यां सर्वायुः संख्यया हरेत्।
लब्धमन्तर्दशा ज्ञेया वर्षमासदिनादिकाः।।

अर्थात् महादशापतेः अन्तर्दशापतेश्चोभयोः नियतवर्षसंख्यां परस्परं गुणयित्वा सम्पूर्णदशावर्षसंख्यया भाजनेन लब्धिः वर्षादयः अन्तर्दशाः भवन्ति।
अपि च–

दशा दशाहता मासाश्चैकस्थानं विना परे।
एकस्थानं त्रिगुणितं दिनान्यन्तर्दशाक्रमः।।[16]

अर्थात् दशान्तर्दशापत्योः विंशोत्तरीदशावर्षे परस्परं गुणितेनागतगुणनफले दश–शतस्थानीयाङ्कः अन्तर्दशायाः मासः भवति, एकस्थानस्थाङ्कः त्रिगुणितः गुणनफलमन्तर्दशायाः दिनसंख्या भवति।

**मानसागर्य्याम्**

> दशा दशा हता कार्या दशभिर्भागमाहरेत्।
> यल्लब्धं स भवेन्मासस्त्रिघ्नं शेषं दिनं भवेत्।।[17]

अर्थात् ग्रहाणामन्तर्दशानयने यस्य ग्रहस्य महादशायां कस्यापि ग्रहस्यान्तर्दशा कर्त्तव्या भवति, सर्वप्रथमं तस्य ग्रहस्य विंशोत्तरीदशामानं तत्तद्ग्रहस्य दशामानेन पृथक्–पृथक् गुणयित्वा गुणनफले दशभिर्भाजितेन लब्धिः मासः शेषश्च त्रिभिर्गुणयित्वा दिनादिकमन्तर्दशामानं भवति।

तद्यथोदाहरणम्–

बृहस्पतिमहादशायां बृहस्पत्यन्तर्दशा साधनीया चेत्–

बृहस्पतिदशामानम्=16

$\therefore (16\times16)\div10=256\div10=$लब्धिः$=25$मासाः,शेषः$=6\times3=18$ दिनानि।

अतः बृहस्पतिदशान्तर्दशा=2 ।01 ।18 वर्षादिकम्।

एवं हि अन्येषां ग्रहाणां दशायामपि तत्तद्ग्रहाणामन्तर्दशाः ज्ञातव्याः।

अपि च–

> षट्त्रिंशैर्विभजेद्दिनीकृतमथैकद्वि–त्रि–वेदेषु षट्
> सप्ताष्टघ्नदशा भवेयुरिति ता एवं दशान्तर्दशाः।।[18]

अर्थात् योगिनीदशामानं दिनात्मकं निर्माय पृथक्–पृथक् दशावर्षसंख्यया संगुण्य षट्त्रिंशैः(36) भाजनेन लब्धिः दिनाद्यन्तर्दशा भवति। तद्यथोदाहरणम्–

मङ्गलायोगिनीदशायां मङ्गलान्तर्दशा अभीष्टा चेत्–

मङ्गलादशावर्षम्=1

1 $12\times30=360$ दिनानि।

$\therefore (360\times1)\div36=360\div36=10$ दिनानि।

एवमेव अन्याषां योगिन्यन्तर्दशा साध्या।

प्रत्येकग्रहविंशोत्तरीदशायां नवानां ग्रहाणामन्तर्दशाः भवन्ति तथा च प्रत्येकयोगिनीदशायामष्टानां योगिनीनामन्तर्दशाः भवन्ति। यथा सूर्यविंशोत्तरीदशायां प्रथमान्तर्दशा सूर्यस्य, द्वितीया चन्द्रमसः, तृतीया कुजस्य, चतुर्थी राहोः, पञ्चमी बृहस्पतेः, षष्ठी शनेः, सप्तमी बुधस्य, अष्टमी केतोः नवमी शुक्रस्य च भवति। एवमेवान्येषु ग्रहेष्वपि ज्ञातव्याः। तथैव मङ्गलायोगिनीदशायां प्रथमान्तर्दशा मङ्गलायाः, द्वितीया पिङ्गलायाः, तृतीया धान्यायाः, चतुर्थी भ्रामर्य्याः, पञ्चमी भद्रिकायाः, षष्ठी उल्कायाः, सप्तमी सिद्धायाः, अष्टमी सङ्कटायाश्चान्तर्दशा भवति। एवमेवान्यासु योगिनीष्वपि ज्ञातव्याः।

सारांशतया ज्ञायते यत् यस्य ग्रहस्य योगिन्याः वा दशा स्यात्, तस्मात् आरभ्य क्रमेणान्येषां ग्रहाणां योगिनीनां वा अन्तर्दशाः साधनीयाः। एतेन–

i. विंशोत्तरीदशा–दशायाः गुणनफलं दशभिर्भाजितं तदा लब्धिः मासाः तथा च शेषं त्रिभिर्गुणितं दिनानि भवन्ति।
ii. विंशोत्तरीदशा–दशायाः परस्परं गुणितेन यद् गुणनफलं प्राप्तं तद् गुणनफले एकस्थानीयमङ्कं विहाय शेषाङ्काः मासाः तथा च एकस्थानीयाङ्कं त्रिभिर्गुणितं दिनानि भवन्ति।
iii. दशा (विंशोत्तरी योगिनी वा)–दशायाः परस्परं गुणयित्वा सम्पूर्णदशावर्षेण (120, 36 वा) भाजनेन लब्धवर्षादिकम् अन्तर्दशा भवति।
iv. योगिनीदशा–दशायाः परस्परं गुणितेन यद् गुणनफलं प्राप्तं तद्गुणनफले त्रिभिर्भाजनेन मासादिकमन्तर्दशा भवति।

एवं ज्ञातुमिदं शक्यते यत् लघुजन्मपद्धति–लघुपाराशरी–भावकुतूहल–होराशास्त्र–जन्मपत्रदीपक–जातकपारिजात–मानसागरीपद्धति–ज्योतिषरत्नाकर–प्रभृति–ग्रन्थेषु अन्तर्दशानयनंप्रक्रिया समाना एव। तत्रा विदुषां मतैक्यमपि दरीदृश्यते। अपि च विशेषतः जन्मपत्रदीपके ध्रुवकवशात् अवरोह–आरोहक्रमेण अन्तर्दशानयनं विहितमस्ति। अपि च विशेषत्वेन लघुपाराशरी–जन्मपत्रदीपक–जातकपारिजात–मानसागरी– प्रभृतिग्रन्थेषु विंशोत्तरी–योगिन्यन्तर्दशयोः आनयनप्रक्रिया भिन्ना–भिन्ना अपि निरूपिता विद्यते सौकर्याय। परमपि तस्याः फलं समानमेव। विस्तृतविवेचनं त्वत्रशोधपत्रे नैव सम्भवतीति शम्।

**संदर्भा**


1. जातकपारिजात–अध्याय–18, श्लोक–2।
2. लघुपाराशरी–दशाफलाध्याय–श्लोक–8।
3. अर्थात् दशाब्दायुर्विंशोत्तर्यां खार्का 120 योगिन्यां षट्त्रिंशज्ज्ञेया इति।
4. लघुजन्मपद्धति–श्लोक–20।
5. लघुपाराशरी–पृष्ठ–14।
6. ज्योतिषरत्नाकर–प्रथमभाग–गणितप्रवाह–अध्याय–9, पृष्ठ–127।
7. भावकुतूहल–अध्याय–16, श्लोक–4।
8. बृहत्पाराशरहोराशास्त्र–अध्याय–52, श्लोक–1।
9. बृहत्पाराशरहोराशास्त्र–अध्याय–52, श्लोक– 1)।
10. जन्मपत्रदीपक–श्लोक–59।
11. जन्मपत्रदीपक–श्लोक–60।
12. जन्मपत्रदीपक–श्लोक–61–64।
13. जन्मपत्रदीपक–श्लोक–65–67।
14. जन्मपत्रदीपक–श्लोक–73।
15. जातकपारिजात–कालचक्रदशाध्याय–श्लोक–107।
16. जातकपारिजात–दशाफलाध्याय–श्लोक–61।
17. मानसागरीपद्धति–पञ्चमाध्याय–श्लोक–8।
18. मानसागरीपद्धति–पञ्चमाध्याय–श्लोक–5।